# .. sa NgrAmavijayavidyA ..

# ॥ सङ्ग्रामविजयविद्या ॥

## Document Information

Text title : saNgrAmavijayavidyA

File name : saNgrAmavijayavidyA.itx

Category : kavacha

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : March 20, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ सङ्ग्रामविजयविद्या ॥

॥ अथ सङ्ग्रामविजयविद्या ॥

ईश्वर उवाच ।
सङ्ग्रामविजयां विद्यां पदमालां वदाम्यहम् ।
ॐ ह्रीं चामुण्डे श्मशानवासिनि खट्वाङ्गकपालहस्ते महा प्रेतसमारूढे
महाविमानसमाकुले कालरात्रि महागणपरिवृते महामुखे बहुभुजे
घण्टाडमरुकिङ्किणि हस्ते अट्टाट्टहासे किलि किलि, ॐ हूं फट्,
दंष्ट्राघोरान्धकारिणि नादशब्दबहुले गजचर्मप्रावृतशरीरे
मांसदिग्धे लेलिहानोग्रजिह्वे महाराक्षसि रौद्रदंष्ट्राकराले भीमाट्टाट्टहासे
स्फुरद्विद्युत्प्रभे चल चल, ॐ चकोरनेत्रे चिलि चिलि, ॐ ललज्जिह्वे,
ॐ भ्रीं भृकुटिमुखि हूंकारभयत्रासनि कपालमालावेष्टित
जटामुकुटशसिशाङ्कधारिण, अट्टाट्टहासे किलि किलि, ॐ ह्वं
दंष्ट्राघोरान्धकारिणि सर्वविघ्नविनाशिनि, इदं कर्म साधय साधय,
ॐ शीघ्रं कुरु कुरु, ॐ फट्, ओमङ्कुशेन शमय प्रवेशय, ॐ रङ्ग
रङ्ग कम्पय कम्पय, ॐ चालय, ॐ रुधिरमांसमद्यप्रिये हन हन,
ॐ कुट्ट, ॐ छिन्द, ॐ मारय, ओमनुक्रमय, ॐ वज्रशरीरं पातय,
ॐ त्रैलोक्यगतं दुष्टमदुष्टं वा गृहीतमगृहीतं वाऽऽवेशय,
ॐ नृत्य, ॐ वन्द, ॐ कोटराक्ष्यूर्ध्वकेश्युलूकवदने करङ्किणि दह,
ॐ पच पच,
ॐ गृह्ण, ॐ मण्डलमध्ये प्रवेशय ॐ किं विलम्बसि
ब्रह्मसत्येन, विष्णुसत्येन, रुद्रसत्येन, ऋषिसत्येन, आवेशय
ओं किलि किलि, ॐ खिलि खिलि विलि विलि, ॐ विकृतरूपधारिणि
कृष्णभुजङ्गचेष्टितशरीरे सर्वग्रहावेशनि प्रलम्बौष्ठिनि भ्रू
भङ्गलग्ननासिके विकटमुखि कपिलजटे ब्राह्मि भज्ज, ज्वालामुखि स्वन,
ॐ रक्ताक्षि घूर्णय भूमिं पातय, ॐ शिरो गृह्ण चक्षुर्मीलय हस्तपादौ
गृह्ण मुद्रां स्फोटय, ॐ फट् ॐ विदारय, ॐ त्रिशूलेन च्छेदय,
ॐ वज्रेण हन, ॐ दण्डेन ताडय,
ॐ चक्रेण छेदय छेदय ॐ शक्त्या भेदय दंष्ट्रया कीलय
ॐ कर्णिकया पाटय, ओमङ्कुशेन गृह्ण, ॐ शिरोक्षिज्वरमैकाहिकं
द्व्याहिकं त्र्याहिकं चातुर्थिकं डाकिनीस्कन्दग्रहान्मुञ्च मुञ्च,
ॐ पच, ओमुत्सादय, ॐ भूमिं पातय, ॐ गृह्ण, ॐ ब्रह्माण्येहि,
ॐ माहेश्वर्येहि, ॐ कौमार्येहि, ॐ वैष्णव्येहि, ॐ वाराह्येहि,
ॐ ओमैन्द्र्येहि, ॐ चामुण्डे एहि, ॐ रेवत्येहि, ओमाकाशरेवत्येहि,
ॐ हिमवच्चारिण्येहि, ॐ रुरुमर्दिन्यसुरक्षयङ्कर्याकाशगामिनि पाशेन

बन्ध बन्ध, अङ्कुशेन कट कट समयन्तिष्ठ, ॐ मण्डलं प्रवेशय,
ॐ गृह्ण मुखं बन्ध,
ॐ चक्षुर्बन्ध हस्तपादौ च बन्ध दुष्टग्रहान्सर्वान्बन्ध, ॐ दिशो
बन्ध, ॐ विदिशो बन्ध, अधस्ताद्बन्ध, ॐ सर्वं बन्ध,
ॐ भस्मना पानीयेन वा मृत्तिकया सर्षपैर्वा सर्वानावेशय, ॐ पातय,
ॐ चामुण्डे किलि किलि, ॐ विच्चे हुं फट् स्वाहा ।
पद्माला जयाख्येयं सर्वकर्मप्रसाधिका ।
सर्वदा होमजप्याद्यैः पाठाद्यैश्च रणे जयः ॥ ३॥

अष्टाविंशभुजा ध्येया असिखेटकषद्करौ ।
गदादण्डयुतौ चान्यौ शरचापधरौ परौ ॥ ४॥

मुष्टिमुद्गरयुक्यौ च शङ्खखड्गयुतौ परौ ।
ध्वजवज्रथरो चान्य सचक्रपरशु परौ ॥ ५॥

डमरुदर्पणाढ्यौ च शक्तिकुन्तधरौ परौ ।
हलेन मुसलेनाऽऽढ्यौ पाशतोमरसंयुतौ ॥ ६॥

ढक्कापणव संयुक्तावभयौ मुष्टिकान्वितौ ।
तर्जयन्ती च महिषं घातनी होमतोऽरिजित् ।
त्रिमध्वाक्ततिलैर्होमो न देया यस्य कस्यचित् ॥ ७॥

इति सङ्ग्रामविजयविद्यावर्णनं सम्पूर्णम् ॥

Proofread by Nat Natarajan, NA

.. sa NgrAmavijayavidyA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*